# वैदिकाभरण

प्रणम्य साङ्गमाम्नायमाचार्यांश्च प्रणीयते ।
व्याख्यानं प्रातिशाख्यस्य गार्ग्यगोपालयज्वना ॥
अर्थरत्नैर्न्यायगुणैः पूर्वशास्त्रार्णवोद्धृतैः ।
रचितं धारयन्त्वेतद्वैदिकाभरणं बुधाः ॥
अथ किमर्थं प्रातिशाख्यं नाम लक्षणं प्रणीयते ।
तदुच्यते--गुरुत्वं लघुता साम्यं इत्यादि सर्वं तु विज्ञेयं
इति वक्ष्यति । तदविज्ञाने पदकर्मविशेषाद्यनवगमा
दाचार्यत्वासिद्धिः । तदसिद्धावध्ययनाद्यसिद्धिः
। न च लिखितपाठादिना वेदोऽधिगन्तव्यः
तस्मात्स्वाध्यायोऽध्येतव्यः इति श्रुतेः । तस्मात् गुरुत्वं
लघुता इत्यादीनां विज्ञानायेदं शास्त्रं प्रणीयते तद्विज्ञाने सत्
याचार्यत्वयोग्यतापत्त्याऽध्ययनाद्युपपत्तिरिति

ननु नैतदस्ति प्रयोजनम् । तथाहि--
गुरुलघ्वादिविज्ञानं नास्यारम्भप्रयोजनम् ।
उक्तं तत्सर्वमङ्गेषु शिक्षाव्याकरणेषु यत् ॥
यदत्र विज्ञेयतया वक्ष्यते गुरुत्वं लघुता साम्यम् ।
इत्यादि तत्सर्वं वेदाङ्गतया प्राप्तेषु
शिक्षाव्याकरणेषूपदिष्टमेव ।
अतो न तद्विज्ञानार्थं प्रातिशाख्यमारम्भणीयमिति ॥

Reference:
R. Sharma Shastri and K. Rangacarya, The Taittirīya Prātiśākhya with the commentaries Tribhāṣyaratna of Somayārya and Vaidikābharaṇa of Gārgya Gopāla Yajvan, Motilal Banarsidass: Delhi, 1985.